भारत-स्वातन्त्र्य-स्वर्ण-जयन्ती-ग्रन्थमाला-४

# काव्यविच्छित्तिमीमांसा

जयमन्तमिश्रः

राष्ट्रिय-संस्कृत-संस्थानम्

# प्राक्कथनम्

*योऽनूचानस्स नो महान्* इत्युद्दिश्य संस्कृतसंरक्षणसंवर्धनप्रचारप्रसारात्मकं स्वोद्देश्यं साधु निर्वहदिदं राष्ट्रियसंस्कृतसंस्थानं भारतस्वातन्त्र्यस्वर्णजयन्तीं विविधैश्शैक्षिककार्यक्रमैरायोजयदिति विज्ञाय समेषां विदुषां संस्कृतानुरागिणां च मनांस्यवश्यं मोमुद्येरन् ।

प्राचीनशास्त्राणां संरक्षणे, संवर्धने, संस्कृताध्ययनपरम्पराया राष्ट्रियैकात्मतासंवर्धनशक्तेश्च प्रचारार्थं संस्थानेनानेन निरन्तरं विहितं सत्प्रयत्नं योगदानं च विद्वत्समवायस्सर्वथाभिनन्दतीति विश्वस्यते ।

भारतस्वातन्त्र्यस्वर्णजयन्तीमभिलक्ष्य प्रवर्तितायां योजनायां राष्ट्रस्यास्य विभिन्नेषु प्रान्तेषु विद्योतमानैर्विद्वत्तल्लजैः नानाशास्त्राणि, तत्र निहितानि वैज्ञानिकतत्त्वानि चाधिकृत्य विरचितानि ग्रन्थकुसुमानि सादरं सञ्चित्य सङ्ग्रथ्य च **भारत-स्वातन्त्र्य-स्वर्णजयन्ती-ग्रन्थमालात्वेन** तत्रभवतां समक्षमुपस्थाप्य महानानन्दस्सन्तोषश्चोपजायेते ।

तत्रेदं **काव्यविच्छित्तिमीमांसाख्यं** ग्रन्थकुसुमं कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयस्य पूर्व-कुलपतिभिः साहित्यव्याकरणादिशास्त्रमर्मज्ञैः राष्ट्रपतिसम्मानितैः आचार्य**जयमन्तमिश्र**महोदयैः प्रणीतम् । ग्रन्थेऽस्मिन् काव्यप्राणभूता रसध्वन्यादयः तत्सौन्दर्यहेतवः गुणालङ्कारौचित्यादयश्च काव्यशास्त्ररीत्या सरलप्रासादिकशैल्या विवेचिताः । ग्रन्थोऽयं काव्यशास्त्रजिज्ञासूनामुपकाराय कल्पत इत्याशास्यते । एतादृशम् अनुपमं ग्रन्थरत्नं

# विषयानुक्रमणिका


| | |
|---|---|
| **प्राक्कथनम्** | v |
| **अवतरणिका** | vii |
| **विषयानुक्रमणिका** | ix-xi |
| **कविप्रशंसा** | १-३७ |
| कविः | १ |
| कविसमयप्रसिद्धिः | ६ |
| कविसृष्टेर्विलक्षणता | ९ |
| काव्यं तल्लक्षणानि च | १२ |
| मम्मटकाव्यलक्षणे गुणदोषविमर्शः | १८ |
| काव्यशास्त्रम् | २५ |
| अलङ्कारशास्त्रम् | २५ |
| साहित्यशास्त्रम्, क्रियाविधिः, क्रियाकल्पः | २६ |
| काव्यसम्प्रदायंसमुद्भवरहस्यम् | २७ |
| काव्यप्रयोजनम् | २९ |
| **रसविच्छित्तिमीमांसा** | ३८-८२ |
| विभावानुभावव्यभिचारसंयोगाद्रसनिष्पत्तिरितिसूत्रव्याख्याने | |
| भरतभट्टलोल्लट- | ६३ |
| रसस्य ध्वन्यमानत्वम् | ६८ |

| | |
|---|---|
| रसस्य चिद्विषयत्वं चिन्मयत्वञ्च | ६९ |
| रसस्य अलौकिकत्वम् | ६९ |
| काव्यश्रवणात्परं रसनिष्पत्तिपर्यन्तं समपेक्षितकालविमर्शः | ७९ |
| **अलङ्कारविच्छित्तिमीमांसा** | ८३-९५ |
| अलङ्कारेषु मौलिकत्वम् | ९२ |
| **रीतिविच्छित्तिमीमांसा** | ९६-११० |
| **ध्वनिविच्छित्तिमीमांसा** | १११-१२६ |
| **वक्रोक्तिविच्छित्तिमीमांसा** | १,२७-१४२ |
| **औचित्यविच्छित्तिमीमांसा** | १४३-१५२ |
| **काव्यविच्छित्तिमीमांसा** | १५३-१७२ |
| अलङ्कारविच्छित्तिः | १५४ |
| रीतिविच्छित्तिः | १५७ |
| वक्रोक्तिविच्छित्तिः | १६० |
| औचित्यविच्छित्तिः | १६१ |
| रसविच्छित्तिः | १६४ |
| ध्वनिविच्छित्तिः | १६७ |
| **सहायकग्रन्थानुक्रमणिका** | १७३-१७९ |

## कविसृष्टेर्विलक्षणता

ध्वनिप्रस्थापनपरमाचार्येण मम्मटेनापि प्रजापतेर्जगत्सृष्टेर्विलक्षणा सत्कवेः काव्यसृष्टिर्भवतीति

**नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।**
**नवरसरुचिरां निर्मितिमादधती भारतीकवेर्जयति॥**

इति काव्यप्रकाशमङ्गलश्लोकेन प्रत्यपादि। तथाहि- विधातुर्जगति नियतिकृतनियमः असाधारणधर्मव्याप्तिरेव परिदृश्यते, यथा यत्र यत्र पद्मं तत्र तत्र सौरभं किन्तु कविनिर्मितौ कान्तामुखेऽपि प्रतिभानिर्मितसौरभादि परिदृश्यते। लोके नियतिकृतनियमेन=दैवरूपादृष्टनियमेन स्वर्गादियोग्य-शरीरान्तरोत्पादनद्वारैव स्वर्गादिप्राप्तिः, किन्तु **कविनिर्माणे स्वर्गप्राप्ति रनेनैव देहेन वरवर्णिनी** इति दर्शनात् अनेनैव शरीरेण स्वर्गप्राप्तिः इति स्पष्टमेव कविवाङ्निर्मितिः नियतिकृतनियमरहिता। सत्त्वरजस्तमोमयी विधातुः सृष्टिः सुखदुःखमोहस्वभावा, किन्तु कविप्रजापतेः सृष्टिः ह्लादैकमयी[1] आनन्दमात्रस्वभावा इति विलक्षणा। वेधसो जगती उपादानादिकारणपरतन्त्रा, किन्तु कविनिर्मितिः भारतीभिन्नस्य समवायादि-कारणस्यानधीनेति अनन्यपरतन्त्रा[2]। विधे रचना मधुराम्ललवणकटुकषाय-तिक्तभेदेन हृद्याहृद्यरूपाः षड्रसाः किन्तु कवेः रचना शृङ्गारहास्य-करुणरौद्रवीरभयानकबीभत्साद्भुतशान्तरूपेण नवरसरुचिरा[3] केवलं हृद्यैव।

एवञ्च विलक्षणसृष्टिकारकत्वेन कविर्विशिष्टप्रजापतिर्भवति। अत एव स विशिष्टकाव्यनिर्माणेन धर्मार्थकाममोक्षादिप्रयोजनानि साधयितुं प्रभवति। अतो हि कविभिः विषयीकृतानां सताम्, असताम्, नियमिता-नाञ्च कविसमयप्रसिद्धानां पदार्थानां वैविध्येन काव्ये वर्णनात्।

---

१. ह्लादैकमयीमित्यत्र एकशब्दः संख्येयवाचकः।
**तत् प्रकृतवचने मयट** (५/४/२१) इति सूत्रेण मयट्प्रत्ययः। एकं वस्तु प्राचुर्येण प्रस्तुतं यस्यां सा एकमयी। ह्लादेन एकमयीति **सुप्सुपेति** समासः। ह्लादेनेति **प्रकृत्यादिभ्य उपसंख्यानम्** इत्यभेदे तृतीया। तेन ह्लादमात्रप्रचुरामित्यर्थः।

२. अन्यस्य भारती भिन्नस्य परतन्त्रा अधीना न भवतीत्यर्थः।

३. नवसंख्याका रसा यस्यां सा नवरसा सा चासौ रुचिरा इति कर्मधारयः न तु नवानां रसानां समाहार इति। तथात्वे नवरसीत्यापत्तेः। अथवा मध्यमपदलोपी कर्मधारयः।



राष्ट्रिय-संस्कृत-संस्थानम्
५६-५७, इन्स्टिट्यूशनल एरिया, जनकपुरी,
नई दिल्ली - ११००५८